# संस्कृत वार्ताः

दिनाङ्क : 08/03/2026

सायम् - 06:20

अनुवादिके - निधिवन्दना

प्रवाचिका - निधिः

आशुलिपिक - कैलाशः

| |
|---|
| इयम् आकाशवाणी<br>सम्प्रति: वार्ताः श्रूयन्ताम्<br>प्रवाचिका - निधिः |

## आदौ मुख्यवार्ता:

- प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदिल्ल्यां प्रायः पंचशत कोट्यधिक त्रयस्त्रिंशत् सहस्ररूप्यकाणां बहुविधविकासात्मक परियोजनानां उद्घाटनम्, शिलान्यासं च विहितवान्।
- अद्य अन्ताराष्ट्रिय-महिला-दिवसः आचर्यते। अवसरेऽस्मिन् राष्ट्रपतिः द्रौपदी मुर्मु: अवोचत् यत् यदा महिलाभ्यः अवसरं समर्थनं च दीयते तदा ताः प्रत्येकस्मिन् क्षेत्रे उत्कृष्टतां प्राप्तुं शक्नुवन्ति इति।
- नेपालदेशस्य संसदीयनिर्वाचनेषु राष्ट्रियस्वतन्त्रपार्टीतिदलं पुरातनदलानि पराभूय प्रचण्-बहुमतेन सह आगामिसर्वकारं निर्मातुं सज्जो वर्तते।
- अपि च,
- आई. सी सी. पुरुषाणां टी-20 क्रिकेट्-विश्वकप्-क्रीडायां, अद्य समिट्-क्लाश्-क्रीडायां, -भारतं न्यूज़ीलैण्ड्-देशेन सह स्पर्धिष्यते।

## अथ वार्ता: विस्तरेण

### प्रधानमन्त्री- नवदिल्ल्यां

प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदिल्ल्यां प्रायः पंचशत कोट्यधिक त्रयस्त्रिंशत् सहस्ररूप्यकाणां बहुविधविकासपरियोजनानां उद्घाटनम्, शिलान्यासं च विहितवान्। अवसरे अस्मिन् श्री मोदी अवदत् यत्, राष्ट्रिय-राजधान्यां सुविधाः, अवसंरचना च निरन्तरं सुदृढाः विस्तारिताः च क्रियन्ते।

**बाइट-पीएम मोदी-दिल्ली डेवलेप-33 से.**

प्रधानमन्त्री अवदत् यत्, भारतं महिला-सशक्तीकरणे नूतनं अध्यायं रचयति, ताः च देशस्य विकासे महत्त्वपूर्णां भूमिकां निर्वहन्ति। सः अवदत् यत्, दिल्ली-नगरस्य मुख्यमन्त्री रेखा गुप्तायाः नेतृत्वे राष्ट्रिय-राजधान्याः निरन्तरं विकासो भवति। भारतस्य महिलाशक्तिः राष्ट्रनिर्माणार्थं महत्त्वपूर्णं योगदानं ददातीति श्री मोदी अवदत्।

**बाइट-पीएम मोदी-भारत नारी-25 से.**

अद्य उद्घाटिताः नूतनः मेट्रो-विभागाः राजधान्याः निवासिनां कृते महत्त्वपूर्णं लाभं प्रदास्यति। प्रधानमन्त्री दिल्ली-मेट्रो-परियोजनायाः उद्घाटनम्, शिलान्यासं च कृतवान्, यस्य मूल्यं प्रायः अष्टादशसहस्राधिक त्रिशत् कोटि रूप्यकानि कोटिरूप्यकाणि आसीत्। सः देहली-मेट्रो इत्यस्य द्वयोः नूतनयोः मार्गयोः अपि उद्घाटनम् अकरोत्। एते मार्गाः राष्ट्रिय-राजधान्याः अनेकेभ्यः महत्त्वपूर्णेभ्यः स्थानेभ्यः साक्षात् सम्पर्कं प्रदास्यन्ति, तथा च नोयिडा-दक्षिण-देहली-विमानस्थानकयोः मध्ये यात्रां कुर्वतां निवासिनां कृते सम्पर्कं वर्धयन्ति। अस्मिन् अवसरे, आवास-नगरकार्य-मन्त्री मनोहरलालः अवदत् यत्, मेट्रो-रेल् इतीदं देहलीनगरस्य जीवनरेखा अभवत्, यात्रिकाणां यात्राकालस्य पर्याप्तं रक्षणं कर्तुं च साहाय्यं करोति।

**राष्ट्रपतिः- अन्ताराष्ट्रिय-महिला-दिवस**

राष्ट्रपतिः द्रौपदी मुर्मुः अवोचत् यत् यदा महिलाभ्यः अवसरं समर्थनं च दीयते तदा ताः प्रत्येकस्मिन् क्षेत्रे उत्कृष्टतां प्राप्तुं शक्नुवन्ति। अद्य नवदेहली-नगरे अन्ताराष्ट्रिय-महिला-दिवसावसरे राष्ट्रिय-स्तरस्य उत्सवम् अभिसंबोधयन्ती राष्ट्रपतिः अवदत् यत् महिलाः उद्यमशीलतायां वा कॉर्पोरेट्-जगति वा सर्वक्षेत्रेषु अग्रे सन्ति इति। राष्ट्रपतिः द्रौपदी मुर्मू अवदत् यत्, भारतं महिलानां नेतृत्वे विकासं प्रति द्रुतगत्या अग्रे याति , कार्यक्षेत्रे महिलानां सहभागिता वर्धिता अस्ति। बेटी बचाओ बेटी पढाओ, पीएम मुद्रा योजना, मिशन शक्ति , इत्यादयः योजनाः महिलानां सशक्तीकरणं कृतवन्तः इति सा अवोचत्।

राष्ट्रपतिः अवदत् यत् शिक्षायां महिलानां सहभागिता वर्धमाना अस्ति अपि च देशे विद्यालयशिक्षायां लैङ्गिक-समता प्राप्ता अस्ति। सा अवोचत् यत् राष्ट्रस्य पुत्र्यः अपि क्रीडासु असाधारणरूपेण उत्तमं प्रदर्शनं कुर्वन्ति ।

**विराम**

**संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रमः आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय- तन्त्रांशे अपि उपलब्धो भविष्यति।**

**अन्ताराष्ट्रिय-महिला-दिवसः**

अद्य अन्ताराष्ट्रिय-महिला-दिवसः आचर्यते। उत्तरप्रदेशे मुख्यमन्त्री योगी आदित्यनाथ् वर्यः अवदत् यत् तस्य सर्वकारः सुरक्षायै, सम्मानाय, स्वावलंबनार्थं च दृढतया प्रतिबद्धः अस्ति इति। सः अद्य लखनऊ -नगरे पिङ्क्-रोजगार-महाकुम्भ-विंशत्यधिक द्विसहस्र तम वर्षस्य कार्यक्रमे अपि भागम् अगृह्णात्। देशस्य विभिन्नेषु भागेषु अयं दिवसः आचर्यते। राष्ट्रपतिः द्रौपदी मुर्मु, उपराष्ट्रपतिः सी. पी. राधाकृष्णन्, प्रधानमन्त्री नरेन्द्रमोदी च अस्मिन् अवसरे शुभाशयाः प्रेषितवन्तः। अस्य वर्षस्य विषयो वर्तते- सर्वाभ्यः महिलाभ्यः बालिकाभ्यश्च अधिकारः, न्यायः कार्यं च। अस्मिन् अवसरे अशेषेऽपि देशे विभिन्न-कार्यक्रमाणाम् आयोजनं प्रचलति। तत्रैव

केन्द्रीययुवकार्यक्रम-खेलमन्त्रालयः अद्य अन्ताराष्ट्रिय-महिलादिवसावसरे नवदिल्ल्यां **ASMITA** इति राष्ट्रव्यापि-एथलेटिक्स लीग इत्येतस्य आयोजनं करोति।

## माय भारत

युवप्रकरण-क्रीडामन्त्रालयेन श्वः दिल्ल्यां विकसितभारत-युवा-कनेक्ट- कार्यक्रमस्य द्वितीयं चरणम् प्रारभ्यते । एषः समारम्भः 'मेरा युवा भारत' इत्यस्य माध्यमेन 'विकसित भारत - सप्तचत्त्वारिंशदधिक-द्विसहस्रतमस्य संकल्पनायां यूनां सहभागितां सुदृढ़ीकर्तुम् आयोज्यते। मन्त्रालयेन सूचितं यत् राष्ट्रियराजधान्याः पञ्चत्रिंशदधिकेभ्यः महाविद्यालयेभ्यः दश-सहस्राधिकाः छात्राः अस्मिन् कार्यक्रमे भागं ग्रहीष्यति। युवनागरिकान् भारतस्य विकासयात्रया सह योजयितुं तथा च उत्तरदायित्वपूर्ण-राष्ट्रनिर्मातृत्वेन तेषां भूमिकां वर्धयितुं विविधसंवादात्मक-सत्राणि, विचार-विमर्शाः, क्रियाकलापाः च आयोजयिष्यन्ते। मन्त्रालयानुसारं 'विकसित-भारत-यंग-लीडर्स-डायलॉग' इत्यस्य प्रस्तोतारः, 'विकसित-भारत-युवा-संसद्' इत्यस्य विजेतारः तथा च अन्ये 'यूथ-आइकॉन-श्रेण्याः युवानः छात्रैः सह वार्तालापं करिष्यन्ति, राष्ट्रनिर्माणे च स्व-अनुभवान् संविभज्य तान् प्रेरयिष्यन्ति च । एषः उपक्रमः पूर्वमेव द्वाविंशति-राज्येषु केन्द्रशासितप्रदेशेषु च चतुस्सप्तत्यधिक-द्विशतं विश्वविद्यालयेषु महाविद्यालयेषु च संप्राप्तः , येन सम्प्रति प्रायः विंशति-सहस्रं युवानः संलग्नाः सन्ति। अस्मिन् कार्यक्रमे पञ्जीकरणं 'मेरा भारत' इति अङ्कीय-मञ्चस्य mybharat.gov.in इत्यस्य माध्यमेन सुलभं भविष्यति।

## नेपाल-निर्वाचनम

नेपालदेशस्य संसदीयनिर्वाचनेषु राष्ट्रियस्वतन्त्रपार्टीतिदलं पुरातनदलानि पराभूय प्रचण्ड-बहुमतेन सह आगामिसर्वकारं निर्मातुं सज्जो वर्तते। बालेन इति नाम्ना प्रसिद्धः पञ्चत्रिंशत्वर्षीयः प्रधानमन्त्रीपदस्य प्रत्याशी बालेन्द्रशाहः पूर्वप्रधानमन्त्रिणं के. पी. शर्मा ओली-महोदयं प्रायः पञ्चाशत्सहस्रमतानां अन्तरेण पराजितवान्। बालेन्द्रः अस्य हिमालयीदेशस्य प्रथमः मधेसी इति प्रधानमन्त्री, देशस्य संसदीयेतिहासस्य च कनिष्ठतमः प्रधानमन्त्री भविष्यति। राष्ट्रियस्वतन्त्रपार्टीति दलेन सम्प्रति प्रत्यक्षनिर्वाचनप्रणाल्या षडाधिकशतं क्षेत्रेषु विजयः सम्प्राप्तः। एतावता नेपालीकाँग्रेसदलेन पञ्चदशासनानि, यूएमएल-दलेन सप्तासनानि, एनसीपी-दलेश च षडासनानि प्राप्तानि। नेपाल-संसदः पञ्चसप्तत्यधिक-द्विशतं सदस्येषु पञ्चषष्ट्यधिकैकशतं सदस्याः प्रत्यक्षमतदानेन, अवशिष्टाः दशाधिकशतं सदस्याश्चच समानुपातिक-प्रतिनिधित्व-प्रणाल्या निर्वाच्यन्ते। भारतस्य प्रधानमन्त्री नरेन्द्रमोदी निर्वाचनस्य सफल-आयोजनाय नेपालस्य जनेभ्यः सर्वकाराय च वर्धापनानि प्रदत्तवान् ।

## क्रिकेट

आई. सी सी. पुरुषाणां टी-20 क्रिकेट्-विश्वकप्-क्रीडायां, अद्य अहमदाबाद्-नगरस्य नरेन्द्र मोदी-क्रीडाङ्गणे समिट्-क्लाश्-क्रीडायां, -भारतं न्यूज़ीलैण्ड्-देशेन सह स्पर्धिष्यते। सायङ्काले सप्त वादने क्रीडा आरभ्यते।

**॥ इति वार्ता: ॥**